म्ये पापेवादौ म्रियते किंच कन्यावृश्चिकवृषसिंहगे चंद्रे स्तोकपुत्रः योगद्वयन्नाराई
लविक्रीडितेनाह वाचस्पतौ नवमपंचमकेंद्रसंस्थे जातागुणा भवति पूर्ववद्विप्र
तियुक्ता साध्वी स्वपुत्रजननी स्वपितागुणाढ्या धूर्नेकुल बहुयश होन्नतिकारिणीच २४२

१४ क्रूरेष्टमे विघने रंध्रे रोगोयस्य स्थितो वयसि तस्य समे प्रदिष्टा सत्स्वर्थयोगे मरणं
स्वयमेव तस्याः कन्यालिग्ने हरिषु वाल्पसृतत्वमिंदो १५ सौरे मण्यवलो वलेन र
हितैः शीतांशुके दृष्टैः क्रोधवीर्यसमन्वितैः पुरुषिणीयद्योजराग्रजक्रमः जीवा
रास्फुजिद्दंदवेभुवलिषु प्रालग्नराशौ समे विख्याताभुविनेकगणस्तकुलानाल
त्रस्तवादिनमपि १५ सौरइति ग्रणोनातिवलिनिचंद्रगुरुक्षबुधेषु त्र्यवलिषु रवि
कुजगुरुभुवलवत्सु विषमराशौ लग्नेजाता पुरुषवत्सग ञ्ञा गुरुशुक्रकुजबु
धेषुवलिषु समराशौ लग्नेकातिमता ग्रणत्काम्रोज्ञयपशापरायणाश्च १५ प्रव्र
ज्यापग्रहदृष्टिएणाट्ट पापेस्तेनवमगात ग्रहस्यतुल्यां प्रवृज्यां जुवतिहृपैत्यं सत्रासयेन
ञ्चाखिवरणविधोपहानकालेचिंतयामपिसकलंविधेयमेतत् १६ पापेति

सप्तमग्रहफलं यदुक्तं तद्धि द्वायनवमे ग्रहे सति नवमतुल्यं पूर्वोक्तं प्रवकुस्मामा । नीति
अत्राध्याये योयोगानुक्तास्ते विवाहकाले कन्यां मार्गणकाले वाग्दानकाले यथा
कालेवर्त्तमानानुक्तीफलदास्युः ॥ इति श्रीमहीधरकृते जातकविवरणे स्त्रीजा
तकाध्यायः ॥ अथ निर्याणाध्यायः ॥ अथाष्टमे सग्रहे तद्धीनेवा मृतिप्रकारं शार्दू
ईलविक्रीडितेनाह मृत्युर्मृत्युगृहे ईक्षणेन वलिभिस्तद्धातुकोपोद्भवस्तत्संयुक्तभा
गात्रजो व्रणभवो वा वीर्यान्वितैर्भूरिभिः अग्न्यंबुघायुधजो ज्वरामयकृतस्तृट्क्षुत्कृ
तश्चाष्टमे स्यार्थैर्निधने चराद्विषु परस्थाध्वपदे स्थिरेष्वपि २ मृत्युरिति यस्याष्टमे
ग्रहदृष्टिस्तं बली ग्रहपश्यति तस्य यो धातुः पित्ताद्धि तत्कोपात्मृतिः यथा रविकुज
योः पित्तं गुरोः कफः शनेर्वातः शुक्रेंद्वोर्वातकफौ बुधस्य त्रयः तदित्ति तेनाष्टमे

न संयुक्ते यद्गं गात्रं रात्रुपगं तज्जो मृत्युः अयमर्थः अष्टमो राशिः कालांगे यत्रास्ति तदं
गे प्रोक्तदोषकोपान्मृतिरिति वदद्वो वलितो यद्यष्टमं पत्रपतितं द्वातकृत्तु कोपान्मृ
तिः अग्नौ तिरथावष्टमे भिन्नितो मृतिः चंडजलेन कुजेन्नस्तेन बुधे ज्वरेण गुरावज्ञा
तरोगेण शुक्रे तृषा शनौ क्षुधया एतेषु वलीयुक्तो मृत्युः शुभकर्मणा वलसहितेन ष
ष्ठेन मध्ये बुभिः कर्मणा मरणप्रदेशमाहुः निधनमिति अष्टमे चरराशौ
परदेशे मृतिः स्थिरराशौ तु स्वदेशे द्विस्वभावे च पथि मृतिः अन्यान्मृतियोगा
नुष्ठानाह लविजाडितेन चतुष्टयेनार लग्नाभिद्दृतस्य सूर्यकुजयोर्मृत्युः खच
कस्थयोः कुम्भे मंदशशिनोः कर्मभितनये वैघातकर्मस्थिते कन्यायां स्वजनाद्धि
मसमकरयोः पापग्रहदृष्टयोः स्यात्तां यकुम्भयोर्दयेर्कत्रात्रिकोणनीतो यदि तदा मज्जनं

२४५ २ श्लोलेति रवौदशमेकुजेचतुर्थेगिरिघातान्मृतिः चतुर्थेशनौसप्तमेचंद्रेदशमे
मेकुजेकूपान्मृतिः चंद्रार्कौक्रूरक्षितौयदिकन्याराशिगतौतदास्वजनान्मृतिः
द्विस्वभावलग्नगौयदिचंद्रार्कौतदाजलेमृतिः मंदेकर्कटेगेजलोदरकृतोमृत्युर्मृगां
केमृगेशशलाशिप्रभवः शशिन्यपशुभयोर्मध्येकुजार्क्षे स्थिते कन्यायांरुधिरोत्थशो
षोत्थजनितस्तदास्थितौशीतगोसौरक्षेत्रयदितद्वदेवहिमगोरज्जुवह्निपातेस्ततः।
२ मंदेदृतिकर्कगेशनौचंद्रेमकरगेजलोदरव्याधिनामृतिः मेषवृश्चिकान्य
तमगेचंद्रेपापद्वयमध्यगतेसतिशस्त्रेणाग्निनावामृतिः कन्यागतेचंद्रेपापद्व
यमध्यगेरुधिरकोपात्शोषाद्वामृतिः मकरकुंभगेचंद्रेपापद्वयमध्यगेरज्ज्वा
वह्निनापतनेनवामृतिः वंधाद्धीनवौमस्थयोरशुभयोःसौम्यग्रहादृष्टयो २४५

द्रष्काणोश्वससर्प्पपाशनिगडैः छिद्रस्थितैर्बंधनं कन्यायामशुभान्वितेस्तमयगे चं
द्रे सितेमेषगे सूर्ये लग्नगते च विद्धि मरणं स्त्रीहेतुकं मंदिरे ४ बंधादिति सोमपाद
द्रेष्कोणेशो यदि पंचमनवमौ तदा बंधनेम्रतिः अष्टमे द्रेष्काणे पाशसर्पनिगडयुते बं
धनेनैवम्रतिः कर्कद्वितीयांत्यो वृश्चिकाद्यद्वितीयौ एते सर्पपाशद्रेष्काणाः मकराद्य
मीनांत्यौ निगडद्रेःकाणौ मीने लग्नगते सप्तमे कन्यास्थे चंद्रे अशुभयुते शुक्रे मेषग
ते रवौ लग्नगते स्वगृहे स्त्रीनिमित्तान्म्रतिः शूलोद्भिन्नतनुः सुखेवनिसुते सूर्येपि
वा रवे यमे सप्तक्षीणे हिमांशुभिस्त्वयुगपत्पापैस्त्रिकोणस्थगैः बंधस्थे च रवौ वियत्य
वनिजे क्षीणेंदुसंवीक्षिते काष्ठेनाभिहतः प्रयाति मरणं सूर्यात्मजेनेक्षिते ५ शूल
लेति कुजे सूर्ये चतुर्थे तृगानो दंशमे शूलरोपितस्य म्रतिः रविचंद्रक्षीणाकुजरा

तुर्थः रविः सप्तमः तदा खड्गाद्विना वह्निना वा नृपक्रोधेन वा मृतिः शनिर्द्वितीयश्चंद्र

श्चतुर्थः कुजो दशमस्तदा व्रणोत्पन्नैः कृमिभिर्मृतिः अन्ययोगान् शनाईलविक्री

डितेनाह खस्थेर्के वृश्चिजेरसातलगतेयानप्रपाताद्वायंत्रोत्पीडनतः कुजेस्तमय

गे क्षीणेंदुद्विनार्कयुजमे विरामध्येरुधिरार्किशीतकिरणैर्युकाजसारक्षेगेयोत्ते

वगिलितेंदुसूर्यरुधिरैर्ब्योमास्तबंधाद्विपान् ८ खस्थइति रविर्दशमः कुजश्च

तुर्थः तदारथाश्वादेर्वह्निनात्पतनेनमृतिः कुजः सप्तमः क्षीणचंद्रार्कशनयोर्लग्ने

तदातैलादियंत्रपीडयान्मृतिः तुलायांकुजः मेषेशनिः मकरकुंभान्यतमेचंद्रेत

दाविष्ट्यांमृतिः क्षीणेंदुर्दशमः सूर्यः सप्तमः कुजश्चतुर्थः वाग्राहणान्तदापिविष्ट

यांमृतिः योगांतरंवैतालीयेनाह न्विलवक्रवीक्षिणेंद्रौनिधनस्थितेर्कजे ग्रहे

२४१ ज्वररोगपीडायाम्मृत्युः स्यात्क्रमित्राल्लग्नादष्टजः ८ वीर्येति यत्र तत्रस्थो चंद्रो
बलवता कुजेन दृष्टः शनिरष्टमः तदा गुह्योत्पन्नो रोगो भगंदरादिस्तत्पीड
याक्रमिपतनेन वाग्न्युल्ककर्मणा वा मिद्रादेहेन वा मृतिर्भवति योगांतरखसंत
तिलकेनाह ॥ अस्ते रवौ सरुधिरे निधने र्कपुत्रे क्षीणे रसातलगते हिमगौ खग
गांतः लग्नात्मजाष्टमतपः स्वीनभौममंदचंद्रैस्तद्रोलक्षि खराश्च लिकुच्चपा
तैः ९ अस्तइति रविकुजौ सप्तमो शनिरष्टमः क्षीणेंदुश्चतुर्थे तदापक्षि
कृता मृतिः अग्निसंस्काराभावस्तत्पर्थः लग्नेर्ककुजः पंचमः शनिरष्टमः चंद्रो
नवमः तदापर्वताग्रात्पतनेन वज्रपातेन भित्तिपातेन मृतिः १० अथयस्मा
न्कयोगानामभावः न चाष्टमं केनचित् दृष्टं युतं वा तन्मृतिं वै नालीयेना स्वा॥ २४१

द्वाविंशः कथितस्तत्कारणं द्रेष्काणो निधनस्य सूरिभिः तस्याधिपतिर्भयोपि
वा निर्याणं स्वगुणैः प्रयच्छति ११ द्वाविंशादिति लग्नद्रेष्काणात्तद्द्वाविंशो द्रे
ष्काणो मृतिहेतुर्बुधैरुक्तः तस्य पतिस्तस्य द्वाविंशद्रेष्काणस्य स्वामी यद्वा भपोऽष्ट
माधिपो वा स्वगुणैः रुग्यंघायुधैस्यादिनोक्तैर्मृतिं ददाति अयमर्थः द्वाविंशो
द्रेष्काणोऽष्टमराशौ भवति यदि लग्नस्यादिद्रेष्काणस्तदाष्टमभवनस्यापि
प्रथमः लग्नस्य द्वितीयेऽष्टमस्यापि स एव लग्नस्य तृतीयेऽष्टमस्यापि स एव सर्वेषा
त्रिंशानामियमेव व्यवस्थितेनयस्योक्तयोगानामभावेऽष्टमे व्यग्रदृग्योगदृष्ट्रा
नाम्नावस्तदा द्वाविंशद्रेष्काणाधिपाष्टमेशयोर्यो बली तदुक्तदोषेण मृतिः
मृतिभूमिज्ञानं च संततिलकेनाह होरानवांशकप्रयुक्तसमानभूमौ योग

२४८ ल्लाणादिभिरतः परिकल्प्यमेतत् मोदस्तम्भृत्पुसमनुपेदितां श्रातुल्यः खेन्द्राद्वि
तेद्दिं गुणितवत्त्रिगुणः शुभेश्च १२ होरेति लग्नस्य यो नवांशस्तदीशो न युक्तो यो
राशिः लग्ननवांशेशो यत्र राशौ स्थितः तत्तुल्यभूमौ मृतीर्वाच्या तद्यथा लग्ननवां
शाधिपे घटमिथुनस्थे गृहे मृतिः कर्ककन्यामकरमीनान्यतमस्थे भूपे सिंहस्थे
ऽरण्ये तुलास्थे ऽन्यभूमौ वृश्चिकस्थे गर्ते धनुस्थे स्वप्रचारभूमौ मेषस्थे जा खे
प्रचारभूमौ वृषस्थे लग्ननवांशाधिपे गोप्रचारभूमौ मृतिरिति न केवलं नवांशा
धिपाश्रितराशिवशेन भूर्वाच्या किंतु योगेक्षणादिभिरप्येतत्कल्प्यं अयमर्थः
लग्ननवांशाधिपो यद्राशौ स्थितस्तत्र चेदन्यग्रहस्य योगो दर्शनं वा तदा तत्तद्ग्रह
स्य भूमिर्देवांघ्र्य विहारस्थादिनोक्ता वाच्या वक्तु नो योगे दर्शने वा बलिनो भू २४८

वोध्याः मोह इति लग्नस्य यावंतोऽनुदितानवांशास्तेषांसंख्यपंडितानांयावत्काल
स्तावत्कालघटिसमयेमोहज्ञानानांवावाच्यः लग्नेस्वपतिदृष्टेसएवकालोमो
हाद्द्विगुणोवाच्यः सोम्यदृष्टेसकालस्त्रिगुणोवाच्यः एवंस्वामिनासोम्यग्रहेण
दृष्टेसकालश्चतुर्गुणोमोहोवाच्यः मृतस्यशरीरपरिणाममालिन्याह हुतदहन
जलविमिश्रैर्भस्मसंक्लेदशोषैर्निधनभवनसंस्थैर्व्यालवर्गैर्विडंतः इतिश
वपरिणामश्चिंतनीयोयथोक्तः पृथुविरचितशास्त्राल्लाफुत्यनूकादिचिंत्य हुत
दहनेति अष्टमभवनगतैर्दहनेजलविमिश्रेद्रेष्काणैः सवस्यक्रमात् सं
क्लेदशोषाः परिणामास्युः अयमर्थः लग्नद्रेष्काणात्तद्द्वाविंशोद्रेष्काणोय
दिदहनद्रेष्काणः पापग्रहद्रेष्काणः तदामृतदेहोऽग्निनादह्यतेभस्मरू

२४९ पः परिणामः अथ यदि जलद्रेष्काणः सौम्यग्रहद्रेष्काणः नद्यां संक्लेदः मृतदे
हो जले क्षिप्यते यदि संमिश्रद्रेष्काणस्तदात्रक्षोभः नद्यन्तेनापि जले क्षिप्य
ते एवमेव ज्ञास्यति सौम्यद्रेष्काणः पापयुक्तो मिश्रः पापद्रेष्काणो वा सौम्य
युक्तो मिश्रः व्यालेति अष्टमस्थे व्यालवर्गे सर्पद्रेष्काणे विडंतः विषेण एवं
तः परिणामो यस्य सः समृतः अष्टमगा लादिभिर्भैः सूचितेऽस्य सर्पैः कर्कास्य
द्वितीयो वृश्चिकाद्य द्वितीयो मीनांत्यश्च व्यालद्रेष्काणः तदुक्तं त्रात्रिशर्द
पूर्वापरगो कीटस्य च मीनपश्चिमो भागः निधने यस्य द्रेष्काणस्तस्य मृतस्य मां
सानि भुंजंति वायसाद्याः प्राणिसमूहा नचात्र संदेहः पापग्रहद्रेष्काणो य
स्याष्टमराशिसंस्थितो भवति दहनं प्राप्नोति नरो मृतमात्रो निक्षिप्तं प्रवदे २४९

न्तु एवं सोम्पद्रेष्काणोजलमध्येक्षिप्यतोनरोमृतः सौम्पद्रष्काणः पापैः पापद्रष्का
णापिसोम्पसंयुक्तः यस्मात्ष्ट मभवनगतःश्रेष्ठप्राप्नोति मरणं तमिति एवं ज्ञा
त्वस्पपरिणामोयथोक्तविचिंत्यः गत्यनूकादिपृथुविस्तीर्णं कृतं पश्चात्स्वमि
दमेवतस्माद्विचार्यंमृतस्यकागतिर्भवत्यतीति गतिः कस्माल्लोकादयमाग
तइत्यनूकं अतीतजन्मआदिश्यापष्टात्तत्रकोदृगासादित्यपि तत्रानूकज्ञानमा
लिन्याह गुरुरुडुपतिशुक्रौसूर्यभौमौयमज्ञौविबुधपितृतिरश्चोनारकीं
यांश्चकुर्युः दिनकरशशिनावार्याधिष्ठिताःत्र्यंशनाथास्त्ववरसममनिकृष्टानत्वं
गकासाद्यनूके १४ गुरुरिति गुर्वादयोविबुधादिलोकगानूजनान्अनूके
प्राग्जन्मनिकुर्युः किंभूतागुर्वादयः दिनकरेति रविचंद्रयोर्योबलीतेनाश्रिता

२५० यत्संज्ञो द्रेष्काणस्तस्य नाथः स्वामिनः संतइत्यर्थः सूर्येंदोर्मध्ये बलिनाश्रिते
द्रेष्काणे ज्ञो गुरौ देवलोकादागतः इति वाच्यं चंद्र ज्ञ शुक्रयोरन्यतमे द्रेष्काणे
ज्ञो पितृलोकादागतः रविकुजान्यतमे द्रेष्काणे ज्ञो तिर्यग्लोकादागतः शनि
बुधान्यतमे द्रेष्काणे ज्ञो नरकादागत इति तत्रापि श्रेष्ठमध्यमहीनत्वज्ञानमा
ह प्रवरेति तुंगाद्वासात् उच्चस्थानचलनात्क्रमेण प्रवरसमनिकृष्टानुक्र
ममध्यमहीनात्त उच्चादौ पूर्वोक्ताः कुर्युः अयमर्थः यस्य ग्रहस्य लोकादागतः स
चेदुच्चस्थस्तदा लोके प्रधान आसीत् इति ज्ञेयं मृतस्य गतिमालिन्याह ग
तिरिति रिपुरंध्रत्र्यंशनाथाः षष्ठाष्टमे द्रेष्काणे ज्ञो गतिप्रदः पूर्वोक्तो कोणांग
तिं ददातीत्यर्थः अयमर्थः यस्य जन्मलग्नात् षष्ठाष्टमसप्तमानि ग्रहस्थानि २५०

तस्यतत्कालंषष्ठेयोद्रेष्काणोयश्चाष्टमेद्रेष्काणःतयोर्योविधिपतात्तयोर्योबल
वान्तस्यलोकोयःपूर्वोक्तःसएवतस्यागतिरितितेनमृतेनतत्रगंतव्यमित्यर्थःअ
स्तिति वाग्राह्यस्यार्थःसप्तमस्यचकारात्कष्टमभगाश्चग्रहेनिजगतिंप्रदेभव
तियद्विषष्ठासप्तमाष्टमानांमध्येद्वित्रीणिवासग्रहाणिअपएकस्मिन्नपि
स्याद्द्वयोग्रहास्तदातेषांयोबलीतल्लोकेमृतस्यगतिर्वाच्या तदुक्तंस्मरपित
त्तिर्यक्नरकान्गुरुरिंदुसितावसृग्रविज्ञयमोरिपुरंध्रत्र्यंशाकपानयंतिचा
स्तारिनिधनस्यादिति मोक्षगतिमाह गुरुरिति कर्कस्थोगुरुःषष्ठस्थान
गःकेंद्रगःअष्टमोवातदैकोयोगःमीनलग्नगतेशुभग्रहेनवांशागोगुरुःअ
न्येबलहीनास्तदाद्वितीयोयोगःएतद्योगद्वयेजातस्यमोक्षगतिःअमूपोगो

मृतकालेपिवक्रमानोमोक्षदोतदुक्तंषष्ठाष्टमकंटगोगुरुरुच्चेवावसानलग्ने
वामीनेथवलेजन्मनिमरणेवामोक्षगतिमाहुरिति १५॥ इतिश्रीमहीधरकृ
तेजातकविवरणेनिर्याणाध्यायस्त्रयोविंशतिः॥ अथनष्टजातकाध्यायः
तत्रप्रसूतिकालमिंग्रवक्ष्यमाह आधानजन्मापरिबोधकालेसंपृच्छतोजन्मवदेद्विलग्ना
त् पूर्वापरार्द्धेभवनस्यविंद्याद्भानावुदग्दक्षिणगेप्रसूतिं १ अधानेति यस्याधानका
लोनज्ञायतेतस्याधानकालंदैवज्ञोजन्मोक्तं तत्कालमिंदुसहितेत्याहिनाजन्मका
लेपिव्याख्यातएवआधानजन्मकालयोरज्ञानेप्रश्नःप्रश्नलग्नात्जन्मप्रवदेत्पृच्छा
लग्नंप्रहृष्टान्कृत्वावक्ष्यमाणविधिनासर्वेवाच्यमित्यर्थः तत्रायनमाहपूर्वेतिपृच्छा
लग्नस्यपूर्वार्द्धपरार्द्धयोःसूर्योत्तरदक्षिणायनयोर्जन्मवदेत्अयमर्थः लग्नाद्यद्वा

रायां मकरादिराशिषट्कगतेर्के उत्तरायणे जन्म प्रवदेत् लग्नद्वितीयहोरायां कर्कादि
षट्कगतेर्के दक्षिणायने जन्म प्रवदेत् १ वर्षर्त्तुज्ञानमुपजात्याह लग्नत्रिकोणेषु गुरु
स्त्रिभागैर्विकल्प्य वर्षाणि वयोनुमानात् ग्रीष्मोर्कलग्ने कथितास्तु शेषैरन्याय
नर्त्तावृतुरर्कचारात् २ लग्नत्रिकोणेति लग्नत्रिकोणेषु प्रश्नलग्नपंचमनवमे
षु त्रिभागैर्लग्नद्रेष्काणैर्गुरुं कल्पयेत् अयमर्थः प्रश्नलग्नस्य प्रथमद्रेष्काणोदये
य एवं लग्नराशिस्तत्रस्थे गुरौ जन्म वाच्यं लग्नद्वितीयद्रेष्काणोदये लग्नात् पंच
मराशिस्थे गुरौ जन्म वाच्यं लग्नतृतीयद्रेष्काणोदये लग्नात् नवमराशिस्थे
गुरौ जन्म वाच्यं यद्यपि सामान्येन गुरुर्द्ववस्यान भुक्तं तथापि द्वादशाब्दाक्रमे
णप्रतिराशौ गुरुः संचारणीयः यथा प्रश्नलग्नस्य प्रथमद्वादशांशोदये लग्न

२५२ राशिभागेगुरोजातः द्वितीयद्वादशांशोदये द्वितीयस्थेगुरोर्जातः एवंतृतीयाद्विद्वा
दशभागोदयेतृतीयादिगुरुरूपविकल्पनेति एवंगुरोरवस्थानज्ञात्वात
तस्यवर्षयोनमानान्वर्षाणिकल्पयेत अथमध्येः तस्याकृतिमंवेद्यवयोनुमा
नंकार्यंतत्रद्वादशांशवशेपुरोराशिचक्रभ्रमणेणभवतितत्रपुरुषलक्षणेक्रेनद
शांशद्वादशविभागेनद्वादशांशावाशिकांद्दशांशेत्रेषुपरिकल्प्यक्षेत्रांगसंस्पृश्यतत्व
घज्ञानंतथार्कपुरुषलक्षणेपादौ समगुल्फौप्रथमंप्रदिष्टंजंघेद्वितीयंतुस्वजा
नुवक्रमेढ्रोरुमुष्कंचनततस्ततोयेनाभिः कटिश्चेतिचतुर्थमाहुः १ उदरंकथ
यंतिपंचमंहृदयंषष्ठमथस्तनान्वितं अथसप्तमंसजत्रुणिकण्ठपृष्ठकंधरो
२ नवमंनयनेचसभ्रूणिसकलाटंदशमंशिरस्तथा अशुभेष्वशुभंदशाफलं २५२

चरणाद्येषु ज्ञेयेषु ज्ञेमनमिति ७ एवं विंशत्यधिक वर्षज्ञाने तीतेवर्षज्ञानोपा
पोनास्तिएवंवर्षज्ञानेऋतुज्ञानमाह ग्रीष्मइतिपृच्छालग्नगतेर्के केद्रेष्काणेवा
ग्रीष्मोज्ञेयः शेषेष्वंशायेस्तद्रेष्काणेवलग्नगेकल्पितानृतवः पूर्वमुक्ताइत्यर्थः॥
उक्तंच द्रेःकाणेशिशिरादयः शशिकुचंद्रज्ञाद्येषु द्रेष्काणेवेति तद्यथालग्न
गतेर्कशनौतद्रेष्काणेवाशिशिरः एवंशुक्रेवसंतः कुजेग्रीष्मः चंद्रेवर्षाबुधेशरत्
गुरोर्हेमंतः वदुक्तेषुलग्नेषुवलिनः ऋतुः लग्नगग्रहाभावेद्रेष्काणेऋतुः अन्येपि
अन्यस्मिन्नयनं अन्यस्मिंश्चऋतोरविचारवशात् ऋतुर्ज्ञेयः अयमर्थः पूर्वा
परार्द्धभवनस्यविंयाज्ञानाद्वुदग्दक्षिणगेप्रसूतिमितिनक्तं तत्रोत्तरायणेयदा
ग्रहेर्कस्यऋतुर्नसंभवतितदार्कचारवशेनऋतुर्वाच्यः मकरादिगेरवौशिशिरा

२५२ द्विचेष्यः इत्यर्थः २ अथ नक्षत्रस्थेय ग्रहपरिवर्त्तनाद्वृष्टुज्ञानं मासत्तिथिज्ञानं चे
द्रवज्ञयाह चंद्रज्ञजीवाः परिवर्त्तनीयाः शुक्रारमंदैरयनेविलोमे दृक्काणभा
गेषु यत्सेतु पूर्वो मासोनुपान्त्यातिथिविकल्प्या ३ चेद्रेदृति अथ नविलोमे
विपरीते सति लग्नग्रहवशात् ऋतुज्ञाते यच्चयनं विपरीतं भवति तदा चंद्रबुधगु
रवः शुक्रकुजज्ञा निभिः परिवर्त्योव्यत्ययेन स्थाप्याः चंद्रः शुक्रेण बुधः कुजेन
गुरुः ज्ञानिनाहे अथ मध्ये यदुत्तरायणे वर्षोज्ञातः तदा वसंतो ज्ञेयः एवं चंद्रशु
क्रेण परिवर्त्तितः अथ दक्षिणायने वसंतः तदा वर्षो ज्ञेयः शुक्रेण चंद्रेण परिव
र्त्तितः अथोत्तरायणे शरत् तदा ग्रीष्मः दक्षिणायने ग्रीष्मे च शरत् इति बुध
कुजावन्योन्यं परिवर्त्तितौ उत्तरायणे हेमंते शिशिरः दक्षिणायने शिशि २५२

रेवप्राप्तेहेमंतइत्तिगुरुस्त्रानिपरिवर्त्तितोइत्तिएवमृतोजातमासज्ञानमाहदृ
ष्काणेति प्रश्नलग्नद्रेष्काणस्यपूर्वभागेपूर्वंज्ञातव्योपूर्वोमासः द्रेष्काणेन्त्यरा
र्द्धतदृत्तोद्वितीयोमासः इत्यर्काक्रम्यानेनमासज्ञानंतिथिज्ञानमाह अनुपा
दिति अनुपातात्रैराशिकात्तिथिकल्प्यालग्नस्यपदृज्ञातानिलिप्ताद्रेष्का
णः तेनचक्रतुज्ञानंतदर्द्धलिप्तात्रातत्रयेणतेनचमासज्ञानं अत्रानुपाता
त्तिथिलिप्तादग्राकेकाज्ञेयाएवंतिथिराद्वित्यभागः एवमर्कस्यराश्यायोभा
गास्त्रज्ञेयाः मांसाराश्यायत्तिथयोभागाः ज्ञातव्यैर्यथाप्रदर्शितांश्याकेत्तम
त्तिथ्योजन्मेतिज्ञेयं २ चंद्रमासेनतिथिमाह अत्रापिहोरापटवोद्विजेंद्राः
सूर्योग्रातुल्यांतिथिमुद्दिशंति राशिद्वसंज्ञेषुविलोमजन्माभागेश्चवेलाक्र

मन्त्रो विकल्प्या ४ अत्रापीति अत्र तिथिज्ञाने होराज्ञानलग्नज्ञामुनयोर्कभागस
मांतिथिं वदंति प्रथमकाले तत्कालिकोर्केण यावंतोंशा भुक्तास्तावंतस्तु उक्तप्रतिप
पदादितिथयो भुक्ता वाच्याः अत्र चांद्रमानेन मकरराशौ ज्ञाते माघमासो ज्ञेयः ए
एवमन्येष्वपि मासकल्पना तदुक्तं पृच्छाकाले रविर्यावंतोंशाः स्फुटेन संभुक्ताः
राशेस्तास्तिथयः स्फुटभुक्ताद्वावर्कमासस्येति एवं दिने ज्ञाते रात्रिदिवाजन्मज्ञा
नमाह रात्रीति रात्रिसंज्ञाराशयः पूर्वमुक्ता गोजाश्वि इत्यादिना रात्रिदिनसं
ज्ञेषु लग्नेषु विपरीतं जन्म ज्ञेयं अयमर्थः मेषवृषमिथुनकर्कधनुर्मकरान्यतमे
प्रश्न० लग्ने दिने जन्म अन्येषु रात्राविति एवं दिनरात्रिआनयनवेलामाह भागै
रिति लग्नभागैः क्रमशः परिपाट्या वेला कल्प्या जन्मसमयो ज्ञेयः अयमर्थः ज

न्मदिनरविज्ञातस्तस्माद्दिनरात्रिप्रमाणमानीय यद्दिवाजन्म नितद्दिनप्रमा
णेन रात्रिजन्म निरात्रिप्रमाणेन तत्काललग्नं लग्नभुक्तपलानि संगुण्य तस्य षष्ट्या
ग्न्युदयप्रमाणेन भागमाहृत्यावाप्तं वेला तावति काले दिनस्य रात्रेर्वा गते जन्मवा
च्यं ४ मतांतरेण मासमाह केचिच्छुक्लाद्याः कथितान्तवा अमाच्छुक्लांत्यसंज्ञक
पर्यंतिमासं लग्नत्रिकोणोत्तमवीर्ययुक्तं भं प्रोच्यते गलभनादिभिर्वा ५ केचि
दिति केचिच्चंद्रयुक्तान्नवांशात् शुक्लांत्यसंज्ञं मासं वदंति अयमर्थः प्रश्नका
ले यस्मिन्नवांशे चंद्रस्तमपि नवांशेन वधा कृत्वा यस्मिन्नवांशे नवमे नवांशे चंद्रस्त
त्ततं नक्षत्रं भवेषां तन्नक्षत्रसंबंधिनि शुक्लांत्यसंज्ञे मासि जन्म वाच्यं यथा कृ
त्तिकायुक्ता कार्त्तिकी पौर्णमासी तया युक्ता कार्त्तिकः एवं मार्गादौ यस्य

२५५ नक्षत्रस्यानुक्रांत्यसंज्ञो मासो नामितस्य गुरुचारोक्तविधिनानुक्रांत्यसंज्ञो मासः
कल्प्यः तथोक्तं नक्षत्रेण सहोदयमस्तं वा याति येन सुरश्रीमैतत्संज्ञं वक्तव्यं वर्षमास
क्रमेणैव १ वर्षाणि कार्त्तिकादीनि आग्नेयाद्द्विभानुयोगिनी क्रमशस्त्रिभं तु पं
चमम् उपांत्यमंत्यं च यद्वर्षेऽस्मि २ तत्र चंद्रो वृषनवांशे तन्नवांशसप्तकस्यार्वाग्भ
वति तदा कार्त्तिको ज्ञेयः १ वृषनवांशसप्तकोर्ध्वं मिथुनेनवांशे तदंशाष्टकस्या
र्वाक् तदा मार्गशीर्ष २ मिथुननवांशाष्टकोर्ध्वं कर्कनवांशे तन्नवांशपंचकार्वाक्
पौषः ३ कर्कनवांशपंचकोर्ध्वं सिंहनवांशे तन्नवांशचतुष्टयार्वाक् माघ ४ सिं
हतन्नवांशे तन्नवांशचतुष्कोर्ध्वं कन्यानवांशे तन्नवांशसप्तकार्वाक् चंद्रे फाल्गुनः
५ कन्यानवांशे तन्नवांशसप्तकोर्ध्वं तुलानवांशे तन्नवांशे षर्वाक् चंद्रे चैत्रः ६ ॥ २५५

तुलानवांशेतन्नवांशात्षट्कोर्ध्वं वृश्चिकनवांशेतन्नवांशात्पंचकादर्वाक् चंद्रे वैसाषः ७
वृश्चिकनवांशेतन्नवांशेर्वा पंचकोर्ध्वं धनुर्नवांशेतन्नवांशाच्चतुष्टयादर्वाक् चंद्रे ज्येष्टः ८
धनुर्नवांशेतन्नवांशाच्चतुष्टयोर्ध्वं मकरनवांशेतन्नवांशात्त्रयादर्वाक् चंद्रे आषा
ढः ९ मकरनवांशेतदंशात्त्रयोर्ध्वं कुंभनवांशेतन्नवांशाद्द्वयादर्वाक् चंद्रे श्रावणः
१० कुंभनवांशेतदंशाद्द्वयोर्ध्वं मीननवांशेतन्नवांशात्पंचकादर्वाक् चंद्रे भाद्रपदः ११
मीननवांशेतदंशात्पंचकोर्ध्वं मेषनवांशेतन्नवांशात्षट्कादर्वाक् चंद्रे आश्विनः
१२ अथ मेषनवांशेतन्नवांशात्षट्कादूर्ध्वं कार्त्तिक इति यस्मात्पूर्वोक्तविधिना
कृत्तिकारोहिण्योः कार्त्तिकः १ मृगार्द्रे मार्गः २ पुनर्वसुपुष्ययोः पौषः ३ सार्पमघे
माघः ४ पूर्वादित्रयं फाल्गुनः ५ त्रिभं पंचमम् इत्युक्ते चित्रास्वात्योश्चैत्रः ६ वि

२५६

शाखास्वात्यनुराधे वैशाखः ७ ज्येष्ठामूले ज्येष्ठः पूर्वोत्तराषाढः ९ श्रवणधनिष्ठे
श्रावणः १० शततारादित्रयं भाद्रः ११ रेवत्यादित्रयमाश्विनः १२ उपांत्यमंत्यं
चेत्युक्ते युक्तांत्यपदण्डेनैतत्कल्पयति यत्र शुक्लपक्षांतो येन नक्षत्रेण युक्तस्तदु
स्तदुपलक्षितो मासो वाच्यः यथा शुक्लपक्षांतो कृत्तिकारोहिण्यन्यतमेन युक्ते
कार्त्तिको मासः एवमन्येपि पूर्वोक्तविधिना मासा ज्ञेया मासस्तु कृष्णपक्षांतप
॥ एवमायस्तदुक्तं यद्वाग्निसंज्ञेत्यां तान्त्रुपक्रमकालेन वांत्राके स्थितस्ततः शियः
पूर्णो यस्मिन्भवति चंद्रमाः जन्ममासः स निर्द्दिष्टो बृहस्पतिपृष्ठतः कृष्णप
क्षांतको मासो विज्ञेयो त्रविषपञ्चितेति मासज्ञातेराशिज्ञानमाह लग्नेति प्र
श्नलग्नस्य तस्मान्नवामपंचमयोश्च मध्यात् युक्तमतो लग्नप्वलेन युक्तं मेषाराशि

२५६

दृश्यंते लग्नत्रिकोणेषु यो बली तद्राशिगे चंद्रे जन्म वाच्यमित्यर्थः तदुक्तं होरा

द्वितीयाधिकलग्नभाजि स्थानं त्रिकोणे शशिनोवधार्यमिति पक्षांतरमाह

अंगेति अंगस्य त्र्यंशनाडिभिर्वा राशिर्ज्ञेयः अयमर्थः कालांगानीत्यादिनाका

लनरत्रयमुक्तं तत्र प्रष्टा प्रश्नकाले शिरआदियदंगं स्पृशति तदंगसंबंधि चंद्ररा

शिर्ज्ञेयः आदिशास्त्रप्रोक्तसत्वानां स्पर्शनश्रवणेक्षणैस्तैः प्रकारांतरेण

जन्मराशिज्ञानमाह उदियावद्भतः अंशकरो विलग्नाच्चंद्राद्वेत्तावति जन्

मराशिः मीनोदये मीनयुगं प्रदिष्टं भक्ताकृताकरहतेश्च चिंलं दं यावदितिपृ

ष्टालग्नात्तुचंद्रो यावद्भतः तावति राशौ स्थितः तावति तावतीये राशौ चंद्रो ज्ञे

यः एवं चंद्रात् जन्मराशिर्वदेत् मीने ति मीने प्रश्नलग्ने मीनराशौ ज्ञेयो न पूर्वोक्तः

२५१ एवमनेकधाराश्यो प्राप्तेविलग्नेयमाह भक्ष्येतिमह्वेणाद्वरणेनाकारेणहृतेनत्राष्टेन
स्थितस्यराशिर्विचार्यः अयमर्थः यद्राशेः संबंधिमद्रूपद्रव्यंतत्मद्रूपप्रियोनरोद्दरूप
तेआनीयतेवातदाकारोवाद्दरूपतेतस्याराशेरष्टौवाभूयतेतद्राशिर्योगेचंद्रेजाता
द्वेयः यथामार्जारादिदर्शनेसिंहः महिषादौदृष्टमरस्यादिनाजन्मराश्योज्ञातिलग्न
माह प्रश्नलग्नेयोनवांशकः सतुल्यंलग्नंवाच्यंप्रश्नलग्नेनवांशराशिरेवजन्मल
ग्नमित्यर्थः पक्षांतरमाह लग्नादितिलग्नात्स्वप्नलग्नद्रेष्काणादारभ्ययवतियत्सं
ख्येद्रेष्काणेरविस्थितस्तस्मात्स्वमात्तावतितत्संख्याराश्योपपृष्टः प्रसूतोजन्मा
निलग्नंवदेत् इतित्राणलंवदतिनमयाकल्पितमुच्यतइत्यर्थः द्रेष्काणगणन २५१
याधाद्दशाधिकेयाद्दशाभिर्भागेहत्वाशेषसंख्ययलग्नंवाच्यंतदुक्तंप्रश्नलग्न

नवांशस्य यो राशिसंज्ञया समः तस्मिन् लग्नगते राशौ एव वक्ष्य जन्म पृच्छतः यावत्सं
ख्ये गतो लग्नात् द्रेष्काणे द्विनक्षत्रतः तावत्संख्ये गते राशौ प्रश्ने जन्म विनिर्दिशे
त् ॥ प्रकारांतरेण लग्नानयनमिंद्रवज्रयाह ॥ जन्मादिशेद्लग्नगे वीर्ययोगे वा छा
यांगुलघ्नेर्कयुते द्विवशिष्टे ॥ श्रीमानसकृत्तो स्थितंतिष्ठता भं मायायास्तयाज्ञोदय
गं प्रदिष्टं जन्मादिशेदिति ॥ लग्नगते ग्रहे द्विवहूनां लग्नगतेषु बलवति लग्नत्वाभा
वे सर्वेषां बलवति ग्रहे छायांगुलघ्ने सति धाधादशाहते शेषे जन्मलग्नं प्रवदेत्
अयमर्थः पृच्छालग्नांतग्रहं तात्कालिकं स्पष्टं कृत्वा लिप्तापिंडं कुर्यात्ततः स
मभूमौ द्वादशांगुलशंकुं संस्थाप्य तस्य छायाया यावत्संगुलानि तैः लिप्तापिंडं संगु
ण्य द्वादशभिर्भजेत् यावानंकोऽवशिष्टः तत्संख्यं मेषादि लग्नं ज्ञेयं जन्मनाति

२५८ कारांतरमाह आसीनेति आरूढीनस्य सौम्यतिष्ठतिनां चतुर्णां पृच्छकानांक्र
मात्ज्ञायाखरवाज्ञोदयगंभंजन्मलग्नप्रदिष्टं अयमर्थः उपविष्टे पृच्छति पृच्छा
लग्नादशमं जन्मलग्नं तिष्ठति पृष्टे के सति प्रश्नलग्नमेव तज्जन्मलग्नमिति स्थि
तर्कं चतुर्तिष्ठतो विलग्नात्पृष्ठस्य सप्तस्थं धनलग्नाच्चउपविष्टस्यास्तमयेव्रज
तोमेषूरणस्थानात् इति ८ प्रकारांतरेण संवेनष्टजातकं न्याईखवि कोडितेना
ह गोसिंहौ जितुमाष्टकौ क्रियतुले कन्यामृगो च क्रमात्संवर्ग्यो दश १० काष्ठ
ये ८ सप्त ७ विषमे ५ शेषाः ४ ९ ११ १२ स्वसंख्यगुणोः जीवारास्फुजिदेंद
वः प्रथमवः छेमाग्रहाः सौम्यवक्राक्षिनां नियतो विधिर्ग्रदयुतो कार्या चतद्गणः
९ गोसिंहविति गोसिंहादयः प्रथमलग्नगताः लिप्तापिंडीकृतासंतः क्रमाद् २५८

द्वाकादिभिरंकैः सवर्णाग्रुणनीयाः शेषानुक्ताः स्वसंख्यया गुणनीयाः अयमर्थः वृषभ
सिंहौ प्रथमलग्नगतौ स्पष्टौ ल्लिप्ता पिंडीकृतौ दशाभिर्गुणयेत् मिथुनवृश्चिकापिद्वृश्चे
अष्टभिः मेषतुले सप्तभिः कन्यामकरौ पंचभिः कर्कश्चतुर्भिः धनुर्नवभिः कुंभ एका
दशभिः मीनश्च द्वादशभिरिति एवं राशीनां विधिर्नियतगुणः अद्ययुते लग्ने स्तद्वर्ग
णाय ग्रहगुणनाच कर्त्तव्यास्तामेवाह जीवेति गुरुः कुजश्च शुक्रः बुधाः प्रथमवत् दशाकादि
भिः क्रमात् गुणनीयाः अयमर्थः गुरोर्लग्नगतेत मेवलग्नं स्वगुणकारहतं दशा
भिर्गुणयेत् कुजे अष्टभिः शुक्रे सप्तभिः बुधे पंचभिः इति शेषा रविचंद्रशनयः सौम्य
वत् गुणवत् पंचभिर्गुणनीयाः अयमर्थः वकुवलमगेषु सर्वेषां गुणकैर्गुणयेत् एवं गु
णितांकं स्थापयेत् ए समाहृतं विघ्न २७ भाजितशेषमंकं दत्वाप्यवानवबि

२५९ न्नोध्यानवाणवास्मात् एवंकलत्रसहजात्मजशत्रुभेभ्यः प्रश्नंवदेत्दुदयराशि
वशान्नतेषां १० सप्ताष्टतमिति प्राकस्थापितांकः सप्तगुणः कार्यः तत्रनवदेया
शेषाध्यावयाद्यानशेषाध्यानदेयाद्व्यत्यर्थः चरलग्नेनवदेया स्थिरेनवशेषाध्यादिस्वभ
भावेनदेयानशेषाध्यांकेषांचिन्मतेलग्नप्रथमद्रेष्काणेनवदेया द्वितीयेशेषाध्याः तृ
तीयेनोभयमिति एवंकृत्वात्रिघ्नेनसप्तविंशत्या भक्तो वाभंत्यक्त्वा शेषांके अ
श्विन्यादिजन्मभंज्ञेयं केषांचिन्मते सप्तविंशतिभक्तानंतरं नवकदानं शेषाधेन
कार्यइति एवमिति प्रश्नलग्नात्सप्तमादिराशिभ्योलग्नवशान्नपृष्टस्तेषां कलत्रादी
नांजन्मवदेत् अयमर्थः यदाभार्यायानष्टजातकंपृच्छति तदातात्कालिकल
ग्नराशिशेषकंदेयंभ्रातुः प्रश्नेराशिद्वयंपुत्रप्रश्नेचतुष्टयंरिपुनष्टजातकप्रश्नेराशि २५९

यंचक्रे लग्ने देयं एवं कृते तद्वेवोदयराशिं प्रकल्प्य तदुक्तगुणकारेण संगुण्य पतत्तस्य
ग्रहगुणकारेणापि संगुण्य नवककदानविशोधने कृत्वा सप्तविंशत्या विभज्य शेषां
कं तुल्यं भार्यादीनां जन्मनक्षत्रं वाच्यं इदमुपलक्षणं राशित्रयफलतात्कालिक
लग्नानि त्रस्यापि जन्मभं वाच्यं एवं नवयुतात्पितुरपि एवमन्यस्यापि ॥ वर्षाद्या
नयनं चक्रांततिलकेनाह वर्षर्त्तुमासतिथयोघ्न निघ्नं हृतं शनिवेदलोदयस्तैनव
भागविकल्पनास्फुः भूयो द्वादिगुणिताः स्वविकल्पभक्ता वर्षादयो नवक
दानविशोधनाभ्यां ॥ वर्षर्त्तुमासेति एवं वर्षादयः पुनर्द्वादिभिः गुणितान
वककदानविशोधनाभ्यां च युताः स्वविकल्पेन भक्ताः संतो वर्षर्त्तुमासादयो जन्मा
निस्युः अयमर्थः प्रश्नलग्नं लिखित्वा पिंडीकृतं राशिगुणकारहतं संस्थाप्य ततो ग्रह

२६०

गुणकारस्तं यत्स्थापितमस्ति तत्स्थानचतुष्टये संस्थाप्यैकत्रैकेनाभिर्द्वितीये ष-
भिस्तृतीये सप्तभिश्चतुर्थे पंचभिर्गुणयेत् ततस्तस्मिन्राशिचतुष्टये पि नवक-
दानविश्लोधने प्राग्वत्कृत्वा स्वविकल्पे गमपहस्य वर्षाद्यो ज्ञेया इति ११
तदेव वर्षाद्यानयनमनुष्टुभा त्रयेण विज्ञेया दण्डाङ्केषु ४५ द्वाभ्यां तु मासास्त-
थैव च अष्टाङ्केष्वपि मासार्द्धं तिथयश्च तथा स्मृता १२ विज्ञेय इति दण्डाकषि-
तिवक्तृवचनं वक्तुयोगिलात्तद्वर्षं ऋतुमासा दण्डाङ्केषु ज्ञेया पक्ष तिथयो अष्टाङ्केषु
ज्ञेया अयमर्थः दण्डागुणितं राशिं स्वविकल्पेन परमायुषा विंशत्यधिकवर्ष-
शतेन विभजेत् प्राप्तं यो कोऽवशिष्यते तावंति पृष्ठे वर्षाणि ज्ञेयानि तमेव राशिं स्वक-
ल्पऋतुसंख्यया विभज्यावशिष्टं ऋतुः ऋतुमपि द्विधा विभज्य एकावशेषे ऋ-

२६०

तोः प्रथमो मासः अन्ये च द्वितीयः एवं कल्प्यं दशगुणे राशिरथ्यासनीयः योग
सावशेषस्ततो राशिस्तद्वाभ्यां विभज्य कावशेषे शुक्लः पक्षः अन्ये कृष्णपक्षः तमे
वराशिं त्रिंशद्भिः संख्याप्य पंचदशभिर्विभज्य शेषांकसमा तिथिर्ज्ञेया एवमष्टगु
णे राशिराप्तस्य १२ दिवारात्रिप्रसूतिं च नक्षत्रानयनं तथा सप्तकेषु पिवर्गेषु
नित्यमेवोपलक्षयेत् १३ दिवेति सप्तहते राशौ दिनरात्रिप्रसवं नक्षत्रं च ज्ञेयं त
था सप्तहृतराशिं द्वाभ्यां विभज्य कावशेषे दिने जन्माद्यस्य रात्रौ तमेव सप्त विं
शत्याहत्वा विंशत्यंकसमं अश्विन्यादि नक्षत्रं च बहुलोपयोगान्नक्षत्रस्य पुनरान
यनं १४ वेलाभय विलग्नं च होरामंशाकमेव च पंचके च विजानीयान्नष्टज्ञा
तसिद्धये १५ वेलामिति वेलालग्नं होरांशाकान् पंचके विंद्यात् तद्यथाय

२६ द्विदिने जन्मज्ञाते रात्रौ वा तद्दिनरात्रिप्रमाणं कृत्वा तेन पंचाश्तत राशिं विभज्या
वशिष्टांकसमे दिनस्य रात्रेर्वा घटिकादिकाले गते जन्म ज्ञेयं एवं काले ज्ञाते रा
श्यादिलग्नं कार्यं तस्य च होरा द्रेष्काण नवांश द्वादशांश त्रिंशांशकार्याः तात्का
लिकाश्च ग्रहा यथोक्तविधिना कार्या उक्तविधिना द्वादशाष्टकवर्गादि
निर्दिष्टाश्च एवं नष्टजातकं साधयेत् २४ अथ प्रकारांतरेण नक्षत्रानयनमा
र्ययाह संस्कारनाममात्रा द्विगुणा छायांगुलैः समायुक्ताः छेयं तु नवकभक्ता
न्नक्षत्रं तदुनिष्ठादि २५ संस्कारेति संस्कारो नाम करणस्य तत्कृतं यन्नर
स्य नाम तस्य या मात्रा ह्रस्वं एकमात्रः द्विमात्रो दीर्घः ह्लनर्द्धमात्रं एवं गणनया २६
नाम्नो मात्राः ता द्विगुणाः कृत्वा प्रश्नकालमीनघाद्वशांगुलशंकुछायांगुल

संख्यायांयुक्ताकार्या: त्रिनवकेनसप्तविंशत्यातामात्राविभज्यावशिष्टांकसं
मंधनिष्टादिनक्षत्रंज्ञेयं २५ प्रकारांतरेणनक्षत्रमार्ययाह द्वित्रिचतुर्द्दिशा २४
दिशा १० तिथि १५ सप्त ७ त्रिगुणा २२ नवा ९ ९ ६ चंद्राद्या: पंचाद्दिशा
ग्रात्तद्दिग्मुखान्विताभंधनिष्टादि १६ द्वित्रिचतुरिति श्लोकत्रय: चतुर्द्दिशाद्दिशा
तिथय: पंचद्दिशात्रिगुणा: सप्तैकविंशतिर्नवाष्टाएते चंद्राद्या: पूर्वाद्याद्दिक्र
मंकाज्ञेया अयमर्थ: पूर्वाभिमुखेपृच्छकेपृच्छतिसतिप्रश्नांकोस्याप्येवमग्ने
याद्दिग्मुखेत्र्याद्ययोंकाग्राह्या: एवंदिगभिमुखेप्रष्टव्यंज्ञानांकमादायपंचद्दगु
णित:कार्य: तद्दिङ्मुखान्विताश्चेतितत्र्यंद्देश्नोतद्दिग्मुखा: प्रष्टायद्दिगभिमु
ख: तन्मुखायावंतोनरा: तत्संख्यायायुक्तश्चकार्य: एवंकृतेयोंकस्तंसप्तविंश्या भ

२६२ त्पाद त्वावल्लग्नांकसंबंधनिष्पन्नादितोजन्मनक्षत्रंवाच्यं १६ नष्टजातकोपसंहारमा
र्ययाह इतिनष्टजातकमिदंबहुप्रकारंमयाकथितंग्राह्यमतः सच्छिष्यैः परीक्ष्य
यत्नाद्यथ्याभवति १७ इष्टन्हेति इतिग्रन्थोपसंहारे एवंनष्टजातकमिदंना
नाविधमुक्तंसमीचीनशिष्यैर्यत्नेनपरीक्ष्ययथासत्त्वंवदंतितथ्यातोस्मान्मदुक्ता
याहं १७ ॥ इतिमहीधरकृतेजातकविवरणेनष्टजातकाध्यायः ॥२६॥ अथद्रे
ष्काणाध्यायः ॥ तत्रमेषादिरूपंवैतालीयेनाह कट्यांसितवस्त्रवेष्टितः कृष्णश्या
क्तइवाभिरक्षितुं रौद्रपरशुंसमुद्यतंधत्तेरक्तविलोचनः पुमान् १ कट्यामिति अ
धनेष्वेभंवराविष्टितंयेनसः श्यामवर्णः आभिमुख्येनरक्षांकर्तुंसमर्थइवभीषणः
लोहितनेत्रोनरः उच्छ्रितकुठारंधरतिमेषेनरद्रेष्काणः सायुधः कुजसंज्ञश्च २ । २६२

मषद्वितीयस्वरूपंचंद्रवज्रयाह रक्तांवरभूषणभक्ष्यचिंताकुंभाकृतिर्वाजिमुखोम्
षार्त्तः एकेनपादेनचमेषमध्ये द्रेकाणरूपंयवनोपदिष्टं २ रक्तांवरेति लोहितव
स्त्रालंकारेभोज्येचमनोयस्याः साघटोदरी अश्ववदनापिपासिता एकचरणेनोपल
क्षिता अयंमेषद्रेष्काणो द्वितीययवनेरुक्तः एवंचतुष्पदद्रेष्काणः स्त्रीद्रेष्काणोर्क
सक्तश्च मेषतृतीयस्वरूपंचंद्रवज्रपाह क्रूरः कलाज्ञः कपिलः क्रियार्थीभग्नव्र
तोभ्युद्यतदंडहस्तः रक्तानिवस्त्राणिविभर्त्तिचंडो मेषेतृतीयः कथितस्त्रिभागः।
३ क्रूरइति विषमस्वभावः कलाचतुरः पिंगलः कर्माभिलाषुकः स्खलितनि
यमः अभिमुखेनोद्धतोदंडः पाणौयस्यसः रक्तवस्त्रधरः क्रोधनः इदृशोमेषतृ
तीयः एवमायुधोनरद्रेष्काणोजीवस्त्रातश्च ३ वृषप्रथमंदोधकेनाह कुंचित

२६ द्वि लनकचाघटदेशादग्धपटात्तृषिताग्रनचित्ताश्राभरणन्यभिवांछतिनीरीरूपमि
यमिदं वृषभेप्रथमस्य ४ कंचितेति कंचिताःकल्पिताःकेशायस्यासाकुंभोदरी
ग्धवस्त्रापिपासः भोजनेचित्तंयस्यासोभूषणेच्छुः एवंरूलाएवस्त्रीद्रेष्काणः सा
मिकः शुक्रसंज्ञश्च ४ अथवृषभद्वितीयंस्वागतयाह क्षेत्रधान्यगृहधेनुकलाभि
ज्ञोलांगलेशकटेकृशालश्च स्कंधमुद्वहतिगोपतुल्यं कृत्यरोजवदनोमलवा
सां ५ क्षेत्रेतिके क्षेत्रेषुसाल्यादिषुवेश्मसुधनेषुनृत्यगीतवादिषुकुशालः हलश
कटयोःप्रवीणः वृषस्कंधः वुभुक्षः छागमुखेवः मलिनांबरः एवंचतुष्पदद्रेष्का
णोबुधसंज्ञः ५ वृषततीयंमौक्तिकमालयाह द्विपसमकायःपांडुरदंष्ट्रःश
रभसमांघ्रिः पिंगलमूर्तिः अधिमृगालोचनव्याकुलचित्तोवृषभवनस्यप्रांतो २६ द्वि
त

यं ६ द्विपेति महाकाराः नतुहस्तिवपुश्वेतदंतः वृहत्पादः नलवणापदचारणः क
पिलांगः अटवीनांमृगानांलोमार्थमभ्यचिंतयत्पस्मः एषचतुष्पदद्रेष्काणः सनिस
क्तः ६ मिथुनाद्यंवसंततिलकेनाह स्रच्याम्बरसमभिवांछतिकर्मनारीरूपा
न्वितानरणकार्यकृतादराच हीनप्रयोष्ठितभुजाच्चुमतीत्रभागमाद्यंततीयमव
नस्यवदंतितज्ज्ञाः ७ स्रच्येति सूच्यांजितकर्मसीवनक्रियातामिछतिमध्यमि
स्त्रीसुरूपाभूषणकार्यकृतप्रयत्ना अनपत्यापुर्ध्ववाहुः रजस्वलाणमलीद्रेष्का
णोवुधसक्तः ७ मिथुनद्वितीयमुपजात्याह गदाग्निसंस्थः कवचीधनुष्मान्नस्त्रा
रास्त्रधारीगरुडाननश्च क्रीडात्मजालंकरणार्थचिंतांकरोतिमध्येमिथुनस्य
राशेः ८ नवांतेति भपवनस्थः वर्मितनुचापहस्तः रणप्रियः शस्त्रधरोगरुड

२६४ वक्त्रः क्रीडायां पुत्रेषु भूषणार्थे च चिंतयत्स्य एषद्रेष्काणः उद्यतायुधः खगेनरः शूरश्शस्त्री ८ मि
थुनतृतीयं स्वागतयाह भूषितो वरुणवद्बहुरत्नो बद्धतूणकवचः सधनुष्कः नृत्यवादित
कलासु च विद्वान्काव्यकृन्मिथुनराश्यवसाने ९ भूषितेति समुद्रवत्सभूतमणिः दुर्ध
रीवर्मभृत्तचापधरः नृत्यवादित्रचित्रादिकलासु च प्रवीणः कविश्च एष नरद्रेष्काणः सा
युधः पुनिसक्तः ९ कर्काद्यं स्वागतयाह पत्रमूलफलभृद्द्विपकायः काननेमलयगः श
रभांघ्रिः क्रोडतुल्यवदनो हयकंठः कर्कटे प्रथमरूपमुशंति १० पत्रेति पत्राणि मूला
नि फलानि विधरतीति गजशरीरः वने चंदनं वृक्षगतः सरभतुल्यपादः शूकरमुखः अ
श्वग्रीवः एष चतुष्पदद्रेष्काणो नरश्च्युतसक्तः १० कर्कद्वितीयमिंद्रवज्रयाह पद्मार्चिता
मूर्द्धनि भोगियुक्ता स्त्री कर्कशारण्यगताविरौति शाखां पलाशस्य समाश्रिता च मध्य २६४

स्थिताकर्कटकस्यराशेः ११ पद्मेति नारीत्रिर सिकच्छेनेपूजिता सर्पयुताकठिनांगो
यौवनायुंतत्याथ्यः वनेआक्रोशतिपलाशशाखामाश्रितायाअग्राकाणमस्तीव्यालद्रेष्काणोभौ
मसक्तः ११ कर्कटत्ततीयद्रेष्काणमाह भार्यार्थमर्णवंनौस्थोगच्छतिसर्पवे
ष्टितः हेमश्चयुक्ताविभूषणेच्छिपिटांगोत्यगतश्चकर्कटे १२ भार्येति जायायाश्च
लंकारनिमित्तसमुद्रेणाविगतः व्यालवृत्तांगोयातिकंठएकाभरणवान्नचिपिटमुखः
णयनरोव्यालेगुरुस्वाक्तः सिंहाद्यद्रेष्काणोद्भवतयाह शाल्मलेनपरिगृध्रजंबुकौश्वान
रश्चमलिनांबरान्वितः रौतिमातृपितृविप्रयोजितः सिंहरूपमिदमाद्यमुच्यते १३
शाल्मलेति गृध्रपक्षीश्रृगालः सारमेयः मलिनवस्त्रोजनकजननीविरहितनश्च
शाल्मलीतरूपरिक्रोशतिएषद्रेष्काणोनरश्चतुष्पदखगसंज्ञः सूर्यत्राक्तश्च १३

२६५ सिंहद्वितीयंद्रेष्काणमाह हयाकृतिः पांडुरमाल्यशेखरो विभर्त्ति कृष्णाजिनकंबलं
नरः दुरासदः सिंह इवात्तकार्मुको नताग्रनासो मृगराजमध्यमः १४ हयेति तुर
गाकरः श्वेतपुष्पशिरा नरः कृष्णमृगत्वचं कंबलं च धारयति केशरीवदुःसा
ध्यो गृहीतधनुः धवमनाशिकाग्रः एष नरश्चतुष्पदद्रेष्काणः सायुधो गुरुसक्तः
सिंहतृतीयमुपजात्याह ऋक्षाननो वानरतुल्यचेष्टो विभर्त्ति दंडं फलमामि
षं च कूर्ची मनुष्यः कुटिलैश्च केशैर्भौमोग्रपरस्यांतगतस्त्रिभागः १५ ऋक्षे
ति भल्लूकमुखः कपिस्वभावः आयुधमाम्रादिफलं मांसं च धारयति दीर्घश्म
श्रुः कुंचितकेशो रूपलक्षितः एष नरश्चतुष्पादः सायुधः कुजसक्तश्च १५ क
न्याद्यमुपजात्याह पुष्पप्रपूर्णेन घटेन कन्या मलप्रदिग्धांवरसंवृतांगी वस्त्रा २६५

र्थसंयोगमभीप्समानागुरोः कुलमृच्छति कन्यकाद्याः ॥ २६ ॥ पुष्पेति कुसुमपूरि
तकुंभेनोपलक्षितः मलिनवस्त्रवेष्टिताशरीरा वास्त्रोऽर्थयोः संबंधमिछति ।
गुरुकुलैषिणी कन्यायाः प्रथमो द्रेष्काणो बुधसंज्ञः ॥ २६ ॥ कन्याद्वितीयं वेताली
येनाह पुरुषः प्रगृहीतलेखनिश्यामो वस्त्रशिरा व्ययायकृत विपुलं च वि
भर्तिकार्मुकरोमव्याप्ततनुश्च मध्यमः ॥ २ ॥ पुरुष इति यथाक्षराणि लिख्यंते ले
खनी गृहीता येन स श्यामवर्णः पटवेष्टितमस्तकः वस्त्रशिराः इति पाठे संयतमू
र्द्धधनस्यायव्ययगणकः विस्तीर्णधनुर्धारी लोमशः इदृशो नरः एष नरद्रेष्का
णः सायुधः कन्याद्रेष्काणः शनिसंज्ञः कन्यायास्तृतीयमुपजात्याह गौरी सुधौतादु
कूलागुप्ता समुच्छ्रिता कुंभकटछुहस्ता देवालयं स्त्री प्रयताप्रवृत्ता वदंतिक

२९९ भांतगतंत्रिभाग १२ गौरीतिगौरवर्णः प्रक्षालितान्यम्बराणिप्रांतभागायस्य दृ
ढोनदुकूलेनाच्छादितादुकूलंहस्तेस्थियाः कन्याघटस्थतीयुतपाणिस्तस्यदं
गंतुमुद्यता समाश्रितादृद्दत्रीनारायणस्यस्त्री ६ द्रेष्काणेत्रुक्रस्थाक्तः तुलाद्य
वसंस्थितिलकेनाद्द वीथ्यंतरायणगतः पुरुषः करतुलाबाहुन्मानमानकुशलः
प्रतिमानहस्तः भांडंविविचिंतयतिजस्यचमूल्यमेतद्रूपंवदंतियवनाः प्रथमंतुला
याः १९ वीथ्यंतरेति मार्गमध्येपण्यभूव्यापणंहट्टंतत्रस्थितोघटसद्दितः
जन्मानेतुधृततुलादेतुर्येद्धानेककंडवायेचप्रवीणः येनस्वर्णरत्नादिपरि
छिद्यतेतस्यप्रतिमानंहस्तेयस्यभांडक्रयक्रयंतस्यचमूल्यंचध्यायतिद्वितीयो २९९
व नरोस्तुलाद्योयंकव्यः भाले नरद्रेष्काणः तुकसक्तः १९ तुलाद्वितीयंत्र्यो

ष्टकेनाह कलत्रार्थपरिग्रहार्थं विनिष्क्रान्तं समभार्य्यामिति ग्रन्थमुखः पुरुषः क्षुधित
तृषितश्च कलत्रस्य कृतान्समुपैति तुलाधरमध्यगतः २० कलत्रमिति तुलामध्य
स्थो नरो यतः क्षुधातृषार्त्तो भार्यापुत्रांश्च मनसा यातिस्मरतीति ततोऽस्मादायनि
गंतुमिच्छतीति ग्रन्थार्थः एवमनरद्रेष्काणः खगः अलिग्रान्त्यः तुलाद्वितीयं वक्त्रास्येन
ह विभीषयंश्चिपिष्कितिरक्तश्चित्रितो वने मृगान् कांचनतूणवमेकृत्त धनुर्द्धरो वा
नररूपभृन्नरस्कन्धलावसातियवनेरुदाहृतः २२ विभीषयंतीति मणिभूषित
स्कवर्णषुधारी धनुर्भृद्वदेवविग्रो ग्रहरूपः धारीवानरेति पाठे कपिरूपधरो नरो वे
ने मृगान्भीषयन्नसन्तिष्ठति एवं यानराकारो नरश्चतुष्पदः सायुधो वृध
स्कः वृश्चिकाद्यमुपजात्याह वस्त्रैर्विहीनाभरणैश्चनारी महासमुद्रात्समुपै

२६१ तिकूलं स्थानच्युता सर्पनिरुद्धपादा मनोरमा वृश्चिकराशिपूर्वे ॥ २२ वस्त्रेरि
ति वासोभिर्भूषणैश्च रहिता स्थानभ्रष्टा भुजगनियमितचरणा सुंदरा स्त्री म
हाधूमेध्या विरमागच्छति एकस्मिंदृक्काणे भालः कुजसक्तः ॥ वृश्चिकद्विती
यद्रेष्काणमाह स्थानसुखान्यभिवांछति नारी भर्तृकृते भुजगावृतदेहा ॥
कच्छपकुंभसमानशरीरा वृश्चिकमध्यमरूपमुशंति ॥ २३ स्थानेति सर्पाच्छा
दितांगा कूर्मपृष्ठघटतुल्यदेहा नारी पतिनिमित्तं स्थानं सुखानि चेच्छति स्त्री
भालदृक्काणे गुरुसक्तः ॥ वृश्चिकतृतीयं पुष्पिताग्रयाह पृथुलचिपिटकू
र्मतुल्यवक्त्रः श्वमृगवराहशृगालभीतिकारी अवति च मलयाकरप्रदेशं
मृगपतिरंत्यगतश्च वृश्चिकस्य ॥ २४ पृथुलेति विस्तीर्णचिपिटकच्छपसदृ २६१

ग्रामुखं यसासः सारमेय हरणे जंबुक क्रोडानां यं कारी नरश्चंदनोत्पत्ति स्थानं रक्षति
ति सिंहाकारश्च एष नरश्चतुष्पद द्रेष्काणश्चंद्र सक्तः धनुपूर्वे मिंद्र वज्रयाद्द मनु
ष्यवक्रोध समानकायो धनुर्विशहाय दिशि तिमाश्रमस्थः क्रूपयोपानितपश्विन
श्चरक्षत्यथाद्यो धनुष त्रिभागः २६ मनुष्येति नराननः तुरगसदृग्रा देहत्वप
श्विनाश्रमगतः ईदृगाख्यापं दीर्घमाद्यायय ज्ञोयकरणे निस्कंकस्रुवादी
नि तापसाश्च स्तत्पतिरेष नरश्चतुष्पद द्रेष्काणः साधुधेणुहस्तः धनुर्द्वितीय
मुपजात्याद्द मनोरमा चंपकदेहवर्णा भद्रासने तिष्टति मध्यरूपा समुद्ररत्ना
नि विघट्टयंति मध्यत्रिभागो धनुषः प्रतिष्टः २७ मनोरमेति चित्ताह्लादका
री पंचकपुष्पैः कनकतुल्यवर्ण तिष्टति श्रीमनानाप्यत्रो मनासागरमणिं श्च

२९९ लपतिस्त्री सिंहासने तिष्ठतीत्येष स्त्रीद्रेष्काणः धनुर्द्वितीयमुपजात्पद कूर्चीनरो
हाटकचंपकाभोवरासनेदंडधरोनिषन्नः कौशेयकान्युद्वहत्तोजिनंचततो
यरूपंनवमस्याद्यः २८ कूर्चीति दीर्घश्मश्रुः सुवर्णपुष्पसमकांति सिंह
सनस्थोनरोदंडहस्तोदुकूलमृगचर्मधारयति नरद्रेष्काणःसायुधोर्कसंज्ञः।
मकरार्ध्वदेोधकेनाह रोमचितोमकरोयमदंष्ट्रः शूकरकायसमानशरीरः।
योक्त्रकृष्णजालकबंधनधारीरौद्रमुखोमकरःप्रथमस्त्र २९ रोमचितइति लोम
शांगःमकरतुल्यदंष्ट्रःवाराहतुल्यदेहःयोक्त्रंवृषयोजनंजालकंपक्षिग्राह
कंधनंनिगडादिएतत्त्रयधरएरौद्रलःविकृताननःएषनरद्रेष्काणःसचिवा २९९
ङःचतुष्पदःमंदासंज्ञः मकरद्वितीयमुपजात्या कलास्वभिज्ञाब्जदलायत

ताम्नीरूपामाविचित्राणिचमार्गमाणा विभूषणालंकृत लोहकाणियोपात्र
हिरणमकरस्यमध्ये २६ कलाम्बिति नृत्यादिकलाप्रवीणः पद्मनेत्रास्याम
वर्णनानावस्त्रान्वेषयति आभरणैः शोभिता लोहाभरणयुक्तकर्णेना
रीमकरद्रेष्काणः शुक्रभ्राजः मकरतृतीयद्रेष्काणे तयाह किंनरोपमतनुं
सकंबलतूणचापकवचैसमन्वितः कुंभमुद्वहति रत्नविचित्रितं स्कंधके म
करराशिपश्चिमः २७ किन्नरेति देवयोनिसमगः कंबलयुतः इषुधनुर्वम
सहितो नरो मणिभूषितमांसगातं घटंधारयति एव नरद्रेष्काणसायुधोवुघग्राज्ञः ।
कुंभाद्यमद्रेष्काणस्तयाह स्नेहमद्यजलभोजनागमव्याकुलीकृतमनाः सकंबलः ।
कोशाकारवसनोजिनान्वितोगृध्रतुल्यवदनोघटादिगः २८ स्नेहेति तैलमद्य

२६९ पानीयमग्नानांप्राप्तामाकाशचित्तंयस्यसः दुर्णयुतः दुकूलवासः मृगचर्मयुतः ग
ृध्रपक्षीसमास्यः एषनारद्रेष्काणःखगः आनिनृक्तः कुंभद्वितीयेवेतालयेनारी
दग्धशाकटेसशाल्मलीकेलोहान्याहरतेंगनावने मलिनपटेनसंवृत्ता भांडेर्मूर्
र्द्धिगतैश्चमध्यमः दग्धेति मलीमसांवराममलकरोपितभांडावन्हिदग्धेश्चा
ल्मलितरुयुतशाकटेस्थितास्त्री अरण्येलोहानिगृह्णाति एषस्त्रीद्रेष्काणो
साग्निकोबुधसक्तः कुंभतृतीयमिंद्रवज्ञ्यायाह श्यामः सरोमश्रवणः किरीटी
त्वक्पत्रनिर्यासफलैर्बिभर्ति भांडानिलोहव्यतिमिश्रितानिसंचारयत्यत्रगतो
घटस्य अत्र रूपमाहइति कृष्णवर्णोलोमशाककर्णौज्ञाम्मोलिमुकुटोनरः त्वक
चर्मपत्राणिदलानिनिर्यासोवृक्षरसोगुग्गुलादिफलमाम्रादिएतैर्मद्दलोहयु २६९

तानिपत्राणिधारयतितानिचेतस्ततश्चालयतिस्थानांतरेतेनयतीत्यर्थः एषनार
द्रेष्काणस्त्रुक्रःप्रोक्तः मीनाद्यंइंद्रवज्रयाह स्रग्भांडमुक्तामणिशंखमिश्रैर्व्या
क्षिप्तहस्तःसविभूषणश्च भार्याविभूषार्थमपांनिधानंनावप्लवन्स्यादिगतोभूष
ण ३४ स्रुग्भांडेति यज्ञोपकरणपात्रैर्मुक्ताफलैःरत्नैःशंखैश्चकाचकैर्मिश्र
हस्तआभरणयुतोनरःस्त्रीणांभूषणनिमित्तंनावंकृत्वासमुद्रंगच्छतिएषनर
द्रेष्काणोगुरुःप्रोक्तः मीनाद्वितीयंवसंततिलकेनाह अभ्युच्छ्रितध्वजपता
कमुपैतियोतंकूलंप्रयातिजलधेःपरिवारयुक्तः वर्णेनचंपकमुखःप्रमदाद्वि
भागोमीनस्यचकथितोमुनिभिर्द्वितीयः ३५ अभ्युच्छ्रितेति वर्णेनकां
त्याचंपककुसुमंप्राप्तितिरस्कारोत्तिचंपकावर्णसखीयुतात्वड्ढ्यो ध्वजा

२७० पताकायंत्रहस्तां पोतं नावमारोह्याभिसमुद्रस्य तटं प्रयाति च एष स्त्री द्रेष्काणश्च
प्रयुक्तः मीनतृतीयद्रेष्काणमिंद्रवज्रयाह स्वभ्रांतिके सर्पनिवेष्टितांगो वस्त्रे
र्विहीनः पुरुषस्तस्यां चोरानलव्याकुलितांतरात्मा विक्रोशते त्योपगतोऽथ
स्य शुद्धि स्वभ्रांतिकेति भुजंगावृतदेहो नग्नतस्करः वन्हिव्याकुलचित्तो वनेग
ते समीपे रोदिति एष व्यालद्रेष्काणः कुजसंज्ञः द्रेष्काणस्वरूपस्य प्रयोजनं स्थ
ले प्रोक्तं यात्रायां च स्पति द्रेष्काणाकारचेष्टागुणसदृशा फलं योजयेद्बुद्धिरेता
द्रेष्काणैः सौम्यरूपकुसुमफलयुतैरत्नभाण्डान्वितैश्च सौम्यैर्दृष्टैर्जयस्यात्प्रदा
रुणसहितैः पापदृष्टैश्च भंगः सामो दाहोऽर्थवंधः समनुजनिगडैः पापयुक्तैर्विपाका
दिति प्रश्ने चोरज्ञानं च अंग्रज्ञा काज्ञायते स्वं द्रेष्काणेन तस्करास्तताः ० रात्रि २७०

ष्यः कालदिग्देशगुणान्वयो ज्ञातिश्च लग्नपात् ॥ इति महीधरकृते जातकविवरणे
टीकायांध्यायः ॥ अथोपसंहाराध्यायः ॥ तत्रादौ कविपित्रादिनामानि व
संततिलकेनाह आदित्यदासतनयस्तदवाप्तबोधः कांपील्यके सवितृ
लब्धवरप्रसादः आवंतिको मुनिमतान्यवलोक्य सम्यक् होरां वराहमि
हिरो रुचिरां चकार १ आदित्येति आदित्यदासनाम्नो विप्रस्य पुत्रस्तस्मा
दादित्यदासादेवप्राप्तज्ञानः कांपिल्लाख्यग्रामेयः सवितारविस्तदाराधनेन
तस्मात्प्राप्तो वररूपो प्रसादो येन सः अवंति उज्जयिनीवासी वराहमिहिराभि
चार्यो मुनिमतानि ऋषिप्रणीतानि सम्यक् सत्यदाहत्येन विचार्य शोभनो हि
होरां जातकशास्त्रं कृतवान् १ राशिप्रभेदा ग्रहयोनिभेदो वियोनिजन्माप्य

२७१ निषेककालः जन्माप्यसद्योमरणं तथायुर्दायविभागोष्टकवर्गसंज्ञा २ राशिप्रभेद
प्रथमाध्यायः ग्रहयोनिभेदो द्वितीयः वियोनिजन्मा तृतीयः निषेकाध्यायः चतु
र्थः जन्माध्यायपंचमः रिष्टाध्यायषष्ठः आयुर्दायाध्यायः सप्तमः दशाध्यायोष्टमः
अष्टकवर्गाध्यायो नवमः ज्योतिषां संज्ञाज्ञानलिप्साद्द कर्माजीवो राजयोगा
न्वयोगा नाभसयोगा द्विग्रहाध्याग्रयोगाः प्रव्रज्यायोगा राशिशीलानि दृष्टिभा
वस्तस्याश्रयोप्यथ कालो: त्र कर्मेति कर्माजीवो दशमः राजयोगाध्याय
एकादशः नाभसयोगाध्याय द्वादशः चंद्रयोगाध्याय त्रयोदशः द्विग्रहयोगा
ध्यायश्चतुर्दशः प्रव्रज्याध्याय पंचदशः राशिशीलाध्यायः षोडशः दृष्टिफला
ध्यायः सप्तदशः भावाध्यायाष्टादशः आश्रययोगाध्याय एकोनविंशः प्रकी २७१

णोध्यायः विंशतिः स्त्रीजातकाध्यायः द्वाविंशतिः निर्याणाध्यायस्त्रयोविंशति
नष्टजातकाध्यायचतुर्विंशतिः द्रेष्काणाध्यायः पंचविंशतिः एवंजातकेपं
चविंशतिरध्यायः इदानींयात्रिकंयोगयात्रायांनिवद्धमध्यायसंग्रहमहक
थयिष्ये तद्देवोपजातित्रयेण ॥ प्रश्नास्तिथिर्भंदिवसःक्षणश्चचंद्रोविल
ग्नप्रभेदःशुद्धिःग्रहाणामथचापवादोविमिश्रकाख्यंतनुवेपनंच ५ प्र
श्नइति प्रश्नाध्यायःतिथिवलाध्यायःनक्षत्राध्यायःदिवसोवारफलंमुहू
र्त्तोध्यायःचंद्रबलंलग्ननिश्चयःलग्नभेदहोराद्रेष्काणाद्यमःग्रहाणांशुद्धिः
कुंडलिकाफलंअपवादाध्यायःमिश्रकाध्यायःअंगस्फुरणं ५ अतःपरंगु
ह्यकपूजनंस्यात्स्वप्नंततस्नानविधिःप्रदिष्टः यज्ञोग्रहाणामथनिर्गम

२७२ स्वक्रमात्सुदिष्टः शाकुनोपदेशः ॥ ६ ॥ अतइति गुरुकार्येनं स्वप्नाध्यायः स्नान
विधिः अथ यज्ञ प्रस्थानं शाकुनाध्यायः विवाहकालः करणं ग्रहाणां प्रोक्तं
पृथक् तद्विपुलात्रास्वास्कंधे लिमि ज्योतिषसमग्रेह्यंमया कृतोदेवविदां
हिताय ७ पृथुविरचितमन्येः शास्त्रमेतत्समस्तं तदनुलघुमयेदं तत्प्रदेशा
र्थमेव कृतमिह हि समर्थो धाविषाणमभलेयमयदिष्ट संक्षेप सज्जैनैः ह
प्यतां तत् ८ ग्रंथस्य यस्य सरतोस्य विना ग्रामेति लेख्याह्कु पुस्तम सुखाधिगम
क्रमेण यद्यामयाकृकृतमल्पमिह कृतं वाकार्ययदत्रविद्भापरिहस्तरा
ग्रं ९ दिनकर गुरुमुनि चारणप्रणिपातकृतप्रसादमतिनेदं शास्त्रमुपसं
हृतं नमोस्तुपूर्वप्रणेतृभ्यः विवाहेति विवाहकालः अहस्य एतामदकर २७२

णस्यविस्तीर्णेनागात्वा एवंज्योतिर्विदांहितायत्रिंशिः स्कंधेगणितहोरासंहि
तारव्येरयंमयाज्योतिषशास्त्रसंग्रहोरचितः संक्षेपकरणंमालिन्याद्द पृथ्वीति
एतत्सकलंशास्त्रमन्यैराचार्यैर्विस्तीर्णंकृतंतदेवमयास्वल्पंकृतंकोदृशांतस्य
देशानुबंधैतैराचार्यैरुपदिष्टेणश्रुत्यायत्रतत्त्वाधिषणाविलसित्वेबुद्धिमगणनि
र्मलीकरणेनसंदर्भग्रंथेभमयतत् दुरूहमन्वग्रन्थमुक्तंतस्यंडितैः स्वल्पतां सर्व
प्रार्थनंवन्नांततिलकेनाद्द ग्रंथेति प्रवरमाणस्यास्यग्रंथस्ययत् लेखकाद्विलेखक
दोषान्तपनूपतियद्यात्रमयानेये यत्कुत्सितंकृतं अल्पंवाकृतंकर्तव्यंनकृतं
नातत्रवद्भुश्रुतानांपंडितानांमुधायोधिगम्ते ज्ञात्वातत्परिपाद्याविदुषामा
त्मर्येविद्यायकार्यमदृष्टान्तेनननागमानीयः शोधनीयश्चैतस्यार्थैः शास्त्रवाक्यांनेव

बृहज्जातकम् सविवरणम् 82/10

82/10

२७३ ग्रंतति लकेनाह ॥ दिनकरेति ॥ रवेर्वर्ग्ण्यादिमुनीनामादित्यदासात्मजवराह

णमया कृतः प्रसादो येन मे लब्धं यस्याः ईदृशी मतिर्यस्य तेन मया एतद्शास्त्रं उपसंग

82/10 हीतं नपद्धिषितं तस्मात्सूर्वार्यप्रणतः पूर्वे शास्त्रकर्त्तृभ्यो नतिरस्तु ॥ १० ॥ इ

ति श्रीमहीधरकृतं बृहज्जातके विवरणे उपसंहाराध्यायः षड्विंशः ॥ २६ ॥

शुभमस्तु ॥ संवत १८६७ ॥ चैत्रसुदि १५ ॥ लीषितं सिववाजारुपण व्यासघू

रामः ॥ नागनगरमध्ये ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिषितं मया ॥ यदि शुद्धमशु

द्धं वा मम दोषो न दीयतां ॥ ज्योतिर्ज्ञानं तथोत्पत्तिम् विदित्वा तु यो नरः ॥ आवयस्य

र्थलोभेन विनेयास्ते तु यत्नतः ॥ १ ॥ विनेयादंडनीयाइत्यर्थः ॥ अथ यौं गोलयोगफलं ॥

यहाणामेकस्मिन् यदि भवति षष्ठः क्रमविधौ भवेद्गोलोयोगः प्रलयति धराभ्रष्यति नदी ॥ ॥ २७३